घटितत्वाद्दोभयथापि तत्र पूज्ये विधेर्वृत्तिरित्यनेन पुण्यकालयुक्ताहोरात्रकर्त्तव्यता षष्ट्युपवासवत्। एकादशीतत्त्वे एतद्बहुधा विमृष्टम्। एवञ्च रात्रिप्रागर्द्धसंक्रान्तौ दिवाशेषार्द्धमात्रस्य तत्पुण्यकालत्वाद्द्वात्रिमुहूर्त्तार्द्धे सायं सन्ध्योपासनं कार्य्यमेव ।*। ब्रह्मपुराणे।
"नित्यं द्वयोरयनयोर्नित्यं विषुवतोर्द्वयोः।
चन्द्रार्कयोर्ग्रहणयोर्व्यतीपातेषु पर्व्वसु॥
अहोरात्रोषितः स्नानं श्राद्धं दानं तथा जपम्।
यः करोति प्रसन्नात्मा तस्य स्यादक्षयञ्च तत्॥"
अहोरात्रोषितः पूर्व्वदिने कृतोपवासः। एतत्परमेव।
"अर्द्धरात्रे व्यतीते तु संक्रान्तिर्यदहर्भवेत्।
पूर्व्वं व्रतादिकं कुर्य्यात् परेद्युः स्नानदानयोः॥"
इति भीमपराक्रमीयम्॥
स्नानदानयोरित्यत्र सप्तमीनिर्द्देशात् परदिवसीयस्नानदानादिनिमित्तकं पूर्व्वदिने उपवाससंयमरूपः व्रतादिकं कुर्य्यादित्यर्थः। इति तिथ्यादितत्त्वम् ॥*॥ अथ रविसंक्रान्तिगणनम्
"नवाष्टशक्रहीनेन शकाब्दाङ्केन पूरिताः।
भूर्व्वाणचन्द्राग्निकाग्नौ कुरामौ वेदयुग्मके॥
१। १५। ३१। ३१। २४॥
अहा मनुपलादेस्तु षष्ट्या लब्धाङ्कमिश्रिताः।
दण्डात् खाग्नौ इषेषू च ३०।५७। पलाद्वित्वा ततः पुनः॥
सप्तावशिष्टा वाराः स्युस्ततो दण्डादिकाः परे।
मेषसंक्रमणे भानोः सिद्धान्तस्फुटसम्मताः॥
भुजौ षड्िषू रामाग्नी २। ५६। ३३। कालो नार्तिर्गजावनी। ६। २२। १८
रामचन्द्रोऽग्नियुग्मश्च ३।१।२३। तर्कोऽङ्क इङ्नवाश्वभौ॥६।२८।५८॥
द्वावष्टद्वेदबाणा २।२८।५४। अब्धिर्वाणशरौ सुराः।४।५५।३३।
षण्नागवेदौ शून्येन्दू ६।४८।१०। एकं शैलभुवौ शराः॥१।१७।५॥
द्वौ षड्ग्नी तथा काला २।३६।६। अब्धीरामाः शरावनी।४।३।१५।
पञ्चाग्नीषू तथा रुद्रा ५। ५३। ११। मेषसंक्रमवारतः।
षड्भेर्योन्या हृपादेस्तु वाराद्याः संक्रमे रवेः॥"
इति ज्योतिस्तत्त्वम्॥
सङ्क्रान्तिचक्रं, क्ली, (संक्रान्त्याश्चक्रम्।) नराणां शुभाशुभ-ज्ञानायनचत्राङ्कितनराकारचक्रम्। यथा,—
"मूर्ध्नि सप्त मुखे त्रीणि हृदये पञ्च विन्यसेत्।
त्रितयं हस्तपादेषु महाविषुवभक्रमात्॥
मस्तके भूपतेः सौख्यं वदने पटुता स्मृभे।
हृदये च धनाध्यक्षोऽर्थप्राप्तिर्दक्षिणे करे॥
वामकरे महद्दुःखं सुखं पादे च दक्षिणे।
भ्रमणं वामपादे च कथितं विषुवत्फलम्॥"
इति महाविषुवचक्रम् ॥*॥
"षड्मूर्ध्नि वदने पञ्च चत्वारि हृदये तथा।
त्रितयं करपादेषु पयोविषुवभक्रमात्॥
मानं मूर्द्ध्नि मुखे चैवं हृदये सुखसम्भवः।
दोः पदोर्द्वयोर्भोगस्त्रासश्च वामयोः स्मृभे॥"
इति जलविषुवचक्रफलम् ॥*॥
"शीर्षे पञ्च मुखे त्रीणि हस्तयोश्च त्रयं त्रयम्।
हृदि पञ्च शशी नाभौ गुदे च पादयो रसाः।
उत्तरायणभाजन्नेयं स्तनचत्रस्थितेः फलम्॥
शीर्षेऽर्थलाभो वदने सुखानि
दक्षे करेऽङ्घ्रौ हृदये च सौख्यम्।
नाभौ शुभं वामकरेऽर्थनाशो
गुह्ये भयं वामपदे प्रवासः॥"
इत्युत्तरायणचक्रफलम् ॥*॥
"शीर्षे त्रीणि मुखे त्रीणि हृदये पञ्च हस्तयोः।
अष्टौ पादद्वयेऽप्यष्टौ दक्षिणायनभक्रमात्॥
शीर्षे मानं मुखे विद्या हृदये वित्तसञ्चयः।
प्रवासः स्यात् करे वामे भिक्षालाभश्च दक्षिणे।
निष्फलं वामपादे च किञ्चिल्लाभश्च दक्षिणे॥"
इति दक्षिणायनचक्रफलम् ॥*॥
"ऋक्षे संक्रमणं यत्र विष्णुपद्यां मुखे च तत्।
चत्वारि दक्षिणे बाहौ त्रीणि त्रीणि पदद्वये॥
चत्वारि वामबाहौ च हृदये पञ्च निर्द्दिशेत्।
अक्ष्णोर्द्वयं द्वयं योज्यं मूर्द्ध्नि द्वौ चैककं गुदे॥
रोगो भोगस्तथा यानं बन्धनं लाभ एव च।
ऐश्वर्य्यं राजपूजा च अपमृत्युरिति क्रमात्॥"
इति विष्णुपदीचक्रफलम् ॥*॥
"मुखे चैकं करे वेदाः पादयुग्मे द्वयं द्वयम्।
क्रोड़े बाणस्तथा वेदाः करे सव्येतरेऽपि च॥
द्वयं द्वयं तथा नेत्रे मस्तके त्रितयं तथा।
द्वयञ्चैव तथा गुह्ये षड़शीत्यां स्मृभे स्थिते॥
मुखे दुःखं करे लाभः पादयोर्भ्रमणं हृदि।
कान्ता स्याद्बन्धनं वामे हस्ते स्यात् स्त्रीयभे नृणाम्॥
सम्मानं नेत्रयोश्चैव अपमानञ्च मस्तके।
गुह्ये चैव भवेन्मृत्युः षड़शीतिफलश्रुतिः॥"
इति षड़शीतिचक्रफलम् ॥*॥
इति ज्योतिस्तत्त्वम्॥

सङ्क्रामः, पुं, (सं+क्रम+घञ्।) दुर्गसञ्चरः। इति हेमचन्द्रः॥

सङ्क्लेदः, पुं, (सं+क्लिद+घञ्।) आर्द्रीभावः। (यथा, हरिवंशे। ५३।
"अनया सह जाह्नव्या मोदमानो ममाज्ञया।
इमं सलिलसंक्लेदं विस्रम्भिर्व्यास सागर!॥")

सङ्ख्यं, क्ली, (सम्यक् ख्यायतेऽत्रेति। सं+ख्या+बाहुलकात् कः।) युद्धम्। इत्यमरः॥ (यथा, गीतायाम्। १। ४६।
"एवमुक्त्वार्ज्जुनः संख्ये रथोपस्थ उपाविशत्॥"
सङ्ख्येये, त्रि॥

सङ्ख्यता, स्त्री, सङ्ख्यत्वम् सङ्ख्येयता। सङ्ख्याशब्दात् भावे तप्रत्ययेन निष्पन्नम्॥

सङ्ख्या, स्त्री, (संख्यायतेऽनयेति। सं+ख्या+अङ्। टाप्।) बुद्धिः। इति राजनिर्घण्टः॥ विचारणा। इत्यमरः॥ (यथा, महाभारते २। ५७। ७।
"यो वेत्ति संख्यां निकृतौ विधिज्ञश्चेष्टास्वखिन्नः कितवोऽक्षजासु।
महामतिर्यश्च जानाति द्यूतं
स वै सर्व्वं सहते प्रक्रियासु॥")
एकत्वादिः। इति मेदिनी॥ सङ्ख्येये, त्रि। यथा,—
"विपणो विक्रयः सङ्ख्याः सङ्ख्येये ह्यादश त्रिषु
विंशत्याद्याः सदैकत्वे सर्व्वाः सङ्ख्येयसङ्ख्ययोः॥
सङ्ख्यार्थे द्विबहुत्वे स्तस्तासु चानवतेः स्त्रियः।
पङ्क्तेः शतसहस्रादि क्रमाद्दशगुणोत्तरम्॥"
इति चामरः॥
"आदश दशस्तुतिपर्य्यन्तं अष्टादश यावत् एकादिकाः संख्याशब्दाः संख्येये द्रव्ये वर्त्तन्ते। त्रिषु लिङ्गेषु तेन संख्यासंख्येययोः सामानाधिकरण्येन वृत्तिः। यथा एका शाटी एकः पटः एकं कुण्डम्। हि शब्दो अवधारणे संख्येय एव न तु संख्यायामित्यर्थः। तेन घटा दश इति साधुर्न घटानां दशेति। किन्तु द्व्येकयोर्द्विवचनैकवचने इति सूत्रे द्व्येकयोरिति निर्द्देशात् संख्यामात्रेऽपि सम्भव इति भाष्यम्। घटानां पञ्च इत्यपि स्यादिति सुभूतिः। वार्त्ताकुरेषा गुणसप्तयुक्ता इति वैद्यकम्। आङ्शब्देन दशशब्दस्याव्ययीभावः। दशशब्दस्य त्रिलिङ्गत्वात् नपुंसकत्वपक्षे क्लीवाद्वेति पक्षे अः तेन आदशं आदशेति पाठः। विंशः। अष्टादशपरा विंशत्याद्याः सर्व्वा एव सङ्ख्याः संख्यायां संख्येये च नित्यमेकवचनान्ता भवन्ति यथा विंशतिर्भावः गवां विंशतिः। संख्या। इह संख्या संख्यान्तरं अन्यथा पूर्व्वेण विरोधः स्यात् संख्या अर्थः अभिधेयो यस्य स संख्यार्थः तत्र संख्यार्थे विंशत्यादौ संख्यायां संख्येये च सामानाधिकरण्यात् द्विवचनबहुवचने भवतः यथा द्वे विंशती गावः गवां वा तिस्रो विंशतयो गावः गवां वा एवं द्वे शते दश शतानीत्यादि। अयमभिप्रायः यदा विंशत्यादीनामनावृत्तिरेकैव विंशतिरेकमेव शतमित्येवं स्यात् तदा पूर्व्वेण एकवचनान्ततैव यथोक्तं विंशतिर्गावः गवां विंशतिरिति। यदा विंशत्यादेरावृत्तिर्विंशतिद्वयं शतद्वयमित्येवं स्यात् तदा अनेन द्विवचनबहुवचनान्तता स्यात् यथोक्तं द्वे विंशती तिस्रो विंशतयः। अतएव परे परिभाषन्ते। विंशत्यादेरनावृत्तौ बहुत्वेऽप्येकवचनं इति एकशेषात् द्वे विंशती तिस्रो विंशतयः इत्यन्येऽपि। स्वमतेऽपि त्र्यादयः संख्याशब्दाव्वान्ता इत्युक्तेः टेर्लोप इति सूत्रे विंशतेस्तेस्त्वाङाविति ङित्वकर्णमेनैव एकवचनान्तताज्ञापकात् क्वचित्वानि इत्यनेन चावृत्तौ द्वित्वबहुत्वसम्भवाचायमर्थोऽवगम्यः। ताश्च संख्यासु विंशताद्या नवत्यन्ताः स्त्रीलिङ्गाः भिन्नलिङ्गेनापि सामानाधिकरण्ये स्त्रिय एव